# Kumaravirachitam Parvati Stava

# કુમારવિરચિતં પાર્વતીસ્તવઃ

## Document Information

Text title : Kumaravirachitam Parvati Stava

File name : pArvatIstavaHkumAravirachitaH.itx

Category : devii, devI, pArvatI, shivarahasya

Location : doc_devii

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 13| 29-43||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 7, 2023

*sanskritdocuments.org*

# કુમારવિરચિતં પાર્વતીસ્તવઃ

ઉમા ગૌરી મહાકાલી મહાગૌરી શિવા સતી ।
શર્વાણી ચણ્ડિકા દુર્ગા રુદ્રાણી ગિરિકન્યકા ॥ ૧॥

મૃડાની પાર્વતી માયા મહામાયા મહેશ્વરી ।
અપર્ણા શામ્ભવી ભદ્રા શુભા ત્રિપુરભૈરવી ॥ ૨॥

શ્રીઃ સર્વમઙ્ગલા લક્ષ્મીઃ ભવાની દક્ષકન્યકા ।
આર્યા હૈમવતી ચેતિ સ્મૃત્વા જયમવાપ્નુયાત્ ॥ ૩॥

એકૈકમપિ યન્નામ ગૌર્યાસ્તદ્દુઃખનાશકમ્ ।
જયદં ધનદં ચૈતત્ આયુર્વૃદ્ધિકરં પરમ્ ॥ ૪॥ (જયપ્રદમિદં ચૈતત્)

તતઃ કુમાર તાં ગૌરીં સ્મૃત્વા યુદ્ધાય યાહિ તે ।
જયો ભવત્યસન્દિગ્ધં તન્નામ જયદં યતઃ ॥ ૫॥

સ્મૃત્વાપિ ગૌરીં ગિરિરાજકન્યાં ધન્યાં ચ માન્યાં ચ કલઙ્કશૂન્યામ્ ।
દુર્ગામનન્યામપિ ભાવયન્તઃ સદ્યો ભવન્ત્યેવ હિ ભાગ્યવન્તઃ ॥ ૬॥

સ્મૃત્વાપિ યાં પાતકમાગરેભ્યો નિર્ગત્ય સઙ્ગત્ય ચ સૌખ્યસઙ્ઘૈઃ ।
સ્વર્ગં સમેત્યાપ્યપવર્ગમેત્ય તિષ્ઠન્તિ ભાગ્યેન નરાઃ શિવાગ્રે ॥ ૭॥

યદ્દૃષ્ટિપાતેન જગત્સમસ્તમુત્પન્નમેતત્ પરિપાલિતં ચ ।
કલ્પાવસાને પ્રલયં પ્રયાતિ સા દેવતા મઙ્ગલદેવતા યા ॥ ૮॥

યત્પાદપદ્મસ્મરણં મુનીનાં તપસ્યયા કેવલમમ્બિકા સા ।
સ્મૃતા સદા સર્વ સુખપ્રદાત્રી સૈષા વિધાત્રી સુખસાગરાણામ્ ॥ ૯॥

યામન્નપૂર્ણાં પ્રવદન્તિ દેવાઃ સ્તુવન્તિ ગન્ધર્વગણા મુનીન્દ્રાઃ ।
મર્ત્યાશ્ચ તત્પાદરજઃપ્રસાદાત્ રમાદિભિઃ સા ખલુ પૂજનીયા ॥ ૧૦॥ (રમાદયઃ)

યસ્યાઃ કટાક્ષપ્રસરેણ ધન્યો દીનો દરિદ્રઃ કૃપણોઽપિ ધન્યઃ ।
માન્યઃ સુરાણાં ધનસાગરાણામધીશ્વરઃ સ્યાદિતિ તાં ભજામ્યામ્ ॥ ૧૧॥

યત્પાદપદ્મામ્બુજરેણુલેશં દધાર શૌરિર્ધૃતકૂર્મરૂપઃ ।
શેષઃ સહસ્રેણ દધાર મૂર્ધ્ના સૈષા ભવાની શુભરાજધાની ॥ ૧૨॥

કુલાચલૈઃ મેરુસમાનધૈર્યૈઃ અતિપ્રયત્નેન વિભુગ્નકાયૈઃ ।
યત્પાદપદ્મામ્બુજરેણુશૈલો ધૃતો મુદા સા ગિરિજા સદાઽમ્બા ॥ ૧૩॥

દિગ્દન્તિભિર્યત્પદપદ્મરેણુઃ ધૃતઃ સ્વકુમ્ભસ્થલપઙ્ક્તિલોઽપિ ।
મદામ્બુધારાપરિવીતગાત્રૈઃ તદ્ધારણાયાસગતૈઃ સ્વતન્ત્રૈઃ ॥ ૧૪॥

યત્પાદપદ્મામ્બુરુહાર્ચનાય રત્નાકરો નૂતનરત્નજાલમ્ ।
સમ્પાદયત્યન્વહમાદરેણ સા કિં ન ગૌરી તવ પૂજનીયા ॥ ૧૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે કુમારવિરચિતં પાર્વતીસ્તવઃ સમ્પૂર્ણઃ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૧૩। ૨૯-૪૩॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 13. 29-43..

Proofread by Ruma Dewan

*Kumaravirachitam Parvati Stava*

pdf was typeset on May 7, 2023

Please send corrections to *sanskrit@cheerful.com*